श्रीमते रामानुजाय नमः

**श्री भगवद्रामानुज मुनिभिरनुग्रिहीतं**

# ॥ शरणागति गद्यम् ॥

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म
व्यामोहतस्तदितराणि तृणाय मेने।
अस्मद्गुरोर्भगव्तोऽस्य दयैकसिन्धोः
रामानुजस्य चरणौ शरणम् प्रपद्ये॥

वन्दे वेदान्तकर्पूरचामीकरकरण्डकम्।
रामानुजार्यमार्याणां चूडामणिमहर्निशम्॥

* भगवन्नारायणाभिमतानुरूप * स्वरूपरूप गुण विभव ऐश्वर्य *
शीलाद्यनवधिकातिशय * असङ्ख्येय कल्याण गुण गणाम् * पद्मवनालयाम् *
भगवतीम् * श्रियम् * देवीम् * नित्यानपायिनीम् * निरवद्याम् * देवदेव दिव्यमहिषीम् *
अखिलजगन्मातरम् * अस्मन्मातरम् * अशरण्यशरण्याम् * अनन्यशरणः *
शरणमहं प्रपद्ये॥ १

पारमार्थिक भगवच्चरणारविन्दयुगळ ऐकान्तिक * आत्यन्तिक परभक्ति परज्ञान
परमभक्तिकृत * परिपूर्णानवरत नित्य विशदतम * अनन्यप्रयोजन
अनवधिकातिशयप्रिय * भगवदनुभवजनित * अनवधिकातिशय प्रीतिकारित *
अशेषावस्थोचित * अशेषशेषतैकरतिरूप * नित्य कैङ्कर्य प्राप्त्यपेक्षया *
पारमार्थिकी भगवच्चरणारविन्द शरणागतिः * यथावस्थिता अविरताऽस्तु मे॥ २

अस्तु ते॥ ३

तयैव सर्वं संपत्स्यते॥ ४

श्रीमते रामानुजाय नमः

अखिलहेयप्रत्यनीक कल्याणैकतान * स्वेतर समस्तवस्तु विलक्षण * अनन्त ज्ञानानन्दैक स्वरूप! * स्वाभिमतानुरूपैकरूप * अचिन्त्य दिव्याद्भुत नित्य निरवद्य * निरतिशय औज्ज्वल्य सौन्दर्य सौगन्ध्य * सौकुमार्य लावण्य * यौवनाद्यनन्तगुणनिधि * दिव्यरूप!

स्वभाविकानवधिकातिशय * ज्ञानबलैश्वर्य * वीर्य शक्ति तेजः सौशील्य वात्सल्य * मार्दव आर्जव * सौहार्द साम्य कारुण्य * माधुर्य गाम्भीर्य औदार्य * चातुर्य स्थैर्य धैर्य शौर्य पराक्रम * सत्यकाम सत्यसङ्कल्प * कृतित्व कृतज्ञताद्यसङ्ख्येयकल्याण * गुणगणौघ महार्णव!

स्वोचितविविधविचित्रानन्त * आश्चर्य नित्य निरवद्य * निरतिशय सुगन्ध निरतिशय सुखस्पर्श * निरतिशय औज्ज्वल्य * किरीट मकुट चूडावतंस * मकरकुण्डल ग्रैवेयक * हार केयूर कटक * श्रीवत्स कौस्तुभ मुक्तादाम * उदरबन्धन * पीताम्बर काञ्ची गुण * नूपुराद्यपरिमित * दिव्यभूषण! * स्वानुरूप * अचिन्त्य शक्ति शङ्ख चक्र गदा[ऽसि] शार्ङ्गाद्यसङ्ख्येय * नित्य निरवद्य * निरतिशय कल्याण * दिव्यायुध!

स्वाभिमत नित्य निरवद्यानुरूप स्वरूपरूप गुण विभव ऐश्वर्य * शीलाद्यनवधिकातिशय * असङ्ख्येय कल्याण गुण गण श्रीवल्लभ! * एवंभूत भूमि नीळा नायक!

स्वच्छन्दानुवर्ति स्वरूप स्थिति प्रवृत्ति भेद * अशेषशेषतैकरतिरूप * नित्य निरवद्य निरतिशय ज्ञानक्रियैश्वर्यादि * अनन्त कल्याण गुण गण * शेष शेषाशन * गरुड प्रमुख * नानाविधानन्त परिजन परिचारिका परिचरित * चरणयुगळ!

परमयोगि वाङ्मनसापरिच्छेध्य स्वरूप स्वभाव स्वाभिमत * विविध विचित्रानन्त भोग्य भोगोपकरण भोगस्थान समृद्ध * अनन्ताश्चर्यानन्त * महाविभवानन्त परिमाण * नित्य निरवद्य निरतिशय वैकुण्ठ नाथ!

स्वसङ्कल्पानुविधायि स्वरूप स्थिति प्रवृत्ति * स्वशेषतैक स्वभाव * प्रकृति
पुरुष कालात्मक विविध विचित्रानन्त * भोग्य भोक्तृवर्ग भोगोपकरण *
भोगस्थानरूप * निखिल जगदुदय विभव लय लील!

सत्यकाम! * सत्यसङ्कल्प! * परब्रह्मभूत! * पुरुषोत्तम! * महाविभूते! *
श्रीमन्! * नारायण! * श्रीवैकुण्ठ नाथ!

अपार कारुण्य सौशील्य वात्सल्य औदार्य * ऐश्वर्य सौन्दर्य महोदधे! *
अनालोचितविशेष * अशेषलोकशरण्य! * प्रणतार्तिहर! * आश्रित
वात्सल्यैकजलधे! * अनवरतविदित निखिलभूतजात * याथात्म्य!
अशेषचराचरभूत * निखिल नियमन निरत! * अशेषचिदचिद्वस्तु
शेषिभूत! * निखिल जगदाधार! * अखिलजगत् स्वामिन्! * अस्मत् स्वामिन्! *
सत्यकाम! सत्यसङ्कल्प! * सकलेतरविलक्षण! * अर्थिकल्पक! *
आपत्सख! * श्रीमन्! * नारायण! * अशरण्यशरण्य! * अनन्यशरणः *
त्वत्पादारविन्दयुगळं * शरणमहं प्रपद्ये॥ ५

[अत्र द्वयम्]

पितरं मातरं दारान् * पुत्रान् बन्धून् सखीन् गुरून्।
रत्नानि धनधान्यानि * क्षेत्राणि च गृहाणि च॥

सर्वधर्मांश्च संत्यज्य * सर्वकामांश्च साक्षरान्।
लोकविक्रान्त चरणौ * शरणं तेऽव्रजं विभो॥ ६

त्वमेव माता च पिता त्वमेव *
त्वमेव बन्धुश्च गुरुस्त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव *

त्वमेव सर्वं मम देवदेव॥ ७

पिताऽसि लोकस्य चराचरस्य *
त्वमस्य पूज्यश्च गुरुर्गरीयान्।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो *
लोकत्रयेऽप्य प्रतिमप्रभाव॥ ८

तस्मात्प्रणम्य प्रणिधाय कायं *
प्रसादये त्वामहमीशमीड्यं।
पितेव पुत्रस्य सखेव सख्युः *
प्रियः प्रियायार्हसि देव! सोढुं॥ ९

मनोवाक्कायैः * अनादिकाल प्रवृत्त * अनन्त अकृत्यकरण कृत्याकरण *
भगवदपचार भागवतापचार * असह्यापचाररूप * नानाविध * अनन्त अपचारान् *
आरब्धकार्यान् * अनारब्धकार्यान् * कृतान् * क्रियमाणान् * करिष्यमाणांश्च सर्वान् *
अशेषतः क्षमस्व॥ १०

अनादिकाल प्रवृत्तं * विपरीत ज्ञानम् * आत्मविषयं * कृत्स्न जगद्विषयम् च *
विपरीत वृत्तम् च * अशेष विषयम् * अद्यापि वर्तमानं वर्तिष्यमाणं च *
सर्वं क्षमस्व॥ ११

मदीयानादिकर्म प्रवाह प्रवृत्ताम् * भगवत्स्वरूपतिरोधानकरीम् * विपरीत ज्ञान
जननीम् * स्वविषयायाश्च भोग्यबुद्धेर् जननीम् * देहेन्द्रियत्वेन भोग्यत्वेन *
सूक्ष्मरूपेण च अवस्थिताम् * दैवीम् गुणमयीम् मायाम् * दासभूतम् *
'शरणागतोऽस्मि; तवास्मि दासः' * इति वक्तारं * मां तारय॥ १२

तेषां ज्ञानी नित्ययुक्त * एकभक्तिर्विशिष्यते।

प्रियो हि ज्ञानिनोऽत्यर्थं * अहं स च मम प्रियः॥

उदारास्सर्व एवैते * ज्ञानी त्वात्मैव मे मतम्।
आस्थितस्स हि युक्तात्म * मामेवानुत्तमां गतिम्॥

बहूनां जन्मनामन्ते * ज्ञानवान् मां प्रपद्यते।
वासुदेवस्सर्वमिति * स महात्म सुदुर्लभः॥

इति श्लोकत्रयोदित ज्ञानिनं * माम् कुरुष्व॥ १३

पुरुषस्स परः पार्थ! * भक्त्या लभ्यस्त्वनन्यया * भक्त्या त्वनन्यया शक्यः *
मद्भक्तिं लभते पराम् * इति स्थानत्रयोदित * परभक्तियुक्तं मां कुरुष्व॥ १४

परभक्ति परज्ञान * परमभक्त्येक स्वभावं * माम् कुरुष्व॥ १५

परभक्ति परज्ञान परमभक्ति कृत * परिपूर्णानवरत * नित्य विशदतम
अनन्य प्रयोजन * अनवधिकातिशयप्रिय भगवदनुभवोऽहं * तथाविध
भगवदनुभवजनित * अनवधिकातिशय प्रीतिकारित * अशेषावस्थोचित *
अशेषशेषतैकरतिरूप * नित्य किङ्करो भवानि॥ १६

एवम्भूत मत्कैङ्कर्य प्राप्त्युपायतय अवक्लृप्त * समस्त वस्तु विहीनोऽपि * अनन्त
तद्विरोधि पापाक्रान्तोऽपि * अनन्त मदपचारयुक्तोऽपि * अनन्त मदीयापचारयुक्तोऽपि *
अनन्त असह्यापचारयुक्तोऽपि * एतत्कार्यकारणभूत * अनादि विपरीताहङ्कार विमूढात्म
स्वभावोऽपि * एतदुभय कार्यकारणभूत * अनादि विपरीत वासना संबद्धोऽपि *
एतदनुगुण प्रकृति विशेष सम्बद्धोऽपि * एतन्मूल * आध्यात्मिक * आधिभौतिक *
आधिदैविक * सुखदुःख तद्धेतु * तदितरोपेक्षणीय * विषयानुभव ज्ञान
सङ्कोचरूप * मच्चरणारविन्दयुगळ ऐकान्तिक * आत्यन्तिक परभक्ति परज्ञान *

परमभक्ति विघ्न प्रतिहतोऽपि * येन केनापि प्रकारेण * द्वयवक्ता त्वं * केवलं
मदीययैव दयया * निःशेष विनष्ट सहेतुक * मच्चरणारविन्दयुगळ ऐकान्तिक *
आत्यन्तिक परभक्ति परज्ञान परमभक्ति विघ्नः * मत्प्रसाद लब्ध
मच्चरणारविन्दयुगळ ऐकान्तिक * आत्यन्तिक परभक्ति परज्ञान परमभक्तिः *
मत्प्रसादादेव * साक्षात्कृत * यथावस्थित मत्स्वरूपरूप गुण विभूति * लीलोपकरण
विस्तारः * अपरोक्षसिद्धमन्नियाम्यता * मद्दास्यैक स्वभाव * आत्मस्वरूपः *
मदेकानुभवः * मद्दास्यैक प्रियः * परिपूर्णानवरत * नित्य विशदतम अनन्य
प्रयोजन * अनवधिकातिशय प्रिय मदनुभवस्त्वं * तथाविध मदनुभव जनित *
अनवधिकातिशय प्रीतिकारित * अशेषावस्थोचित * अशेषशेषतैकरतिरूप * नित्य
किङ्करो भव॥ १७

एवम्भूतोऽसि। १८

आध्यात्मिक आधिभौतिक * आधिदैविक दुःखविघ्न गन्ध रहितस्त्वं *
द्वयमर्थानुसन्धानेनसह * सदैवं वक्ता * यावच्छरीरपातं * अत्रैव
श्रीरङ्गे सुखमास्व॥ १९

शरीरपातसमये तु केवलं * मदीययैव दयया अतिप्रबुद्धः * मामेव अवलोकयन् *
अप्रच्युत पूर्व संस्कार मनोरथः * जीर्णमिव वस्त्रं सुखेनेमां प्रकृतिं *
स्थूलसूक्ष्मरूपं विसृज्य * तदानीमेव मत्प्रसादलब्ध मच्चरणारविन्दयुगळ
ऐकान्तिक * आत्यन्तिक परभक्ति परज्ञान * परमभक्ति कृत * परिपूर्णानवरत *
नित्य विशदतम अनन्य प्रयोजन * अनवधिकातिशयप्रिय मदनुभवस्त्वं *
तथाविध * मदनुभवजनित * अनवधिकातिशय प्रीतिकारित * अशेषावस्थोचित *
अशेषशेषतैकरतिरूप * नित्य किङ्करो भविष्यसि॥ २०

मा ते भूदत्र संशयः॥ २१

श्रीमते रामानुजाय नमः

* अनृतं नोक्तपूर्वं मे * न च वक्ष्ये कदाचन * रामो द्विर्नाभिभाषते।

सकृदेव प्रपन्नाय * तवास्मीति च याचते।

अभयं सर्वभूतेभ्यो * ददांयेतद्व्रतं मम॥

सर्व धर्मान् परित्यज्य * मामेकं शरणं व्रज।

अहं त्वा सर्वपापेभ्यो * मोक्षयिष्यामि मा शुचः॥

इति मयैव ह्युक्तम्॥ २२

अतस्त्वं तव तत्त्वतो मज्ज्ञानदर्शन प्राप्तिषु * निस्संशयस्सुखमास्व॥ २३

अन्त्यकाले स्मृतिर्या तु * तव कैङ्कर्यकारिता।

तामेनां भगवन्नद्य * क्रियमाणं कुरुष्व मे॥

**॥ इति शरणागति गद्यं समाप्तं॥**